This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ शेषमात्रस्यैव स्वमते निरुक्तादुष्टाविशेषदस्यादित्यंथस्य सद्धेतौ लक्षणापरत्वासंभवादलक्ष्यतामप्र
दर्शनाभिप्रायेणानुपायय निस्याद्वेनादिना असाधारण्यादिनिदूषकत्वस्य साध्यादिः साध्यवन्निष्ठस्य ध्वंसप्रागभावस्य दोषतयातादृशप्रसिद्धे
वतस्वरूपस्य दूषकतास्य स्वमित्याह नुसर्वेषां आदिनातत्र शाब्दे वैलक्षण्यस्य वा तादृग्वृत्तीति असमवेतस्य तादृग्वृत्तीत्यर्थः यद्रूपे
नित्व विशिष्टस्यैव साध्याभावव्याप्यस्य तस्यानियतत्वतया केवलस्य तस्याशेषत्वात् अत्र आह यद्रूपेणेति तद्रूपविरहादिति निरुक्तव्याप्या
सत्वे न द्रव्यत्व विरहादित्यर्थः अत्र तस्यासंस्फुटीकर्तुमाह सद्धेतोरिति ननु नयो रुद्धत्वेन कथमसाधारणादिपदे तो च्छेदकरूपस्यतो
व्याप्येऽसाधारणादीति सत्यासन् अनित्यपक्षपदबोध्यः तद्रूपस्य स्वपक्षासत्वं गौणीकाराद्यमथ्या व्याप्येऽनुमित्यजनकतादि
तिहेत्वोरेवैमेव कारः प्रतिबंधकत्वमित्यनेन रयोऽपदसाध्याये न नाहेशैव कारार्थं व्याकरोति परमायातीसाहित्या असत्वादप्रसिद्ध
त्वात् अप्यत्यतिप्रतिबंधकज्ञानविषयीभूतस्य विशिष्टस्यासत्वस्यत्वेपि दोषाभ्युपगम इत्यर्थः तस्यापि बाधभ्रमविषयस्या
पि ननु साध्याभाव यमालंबो धरति सति सोदोष इत्यत आह कोहीति तत्याव साध्याभावव्याप्यप्रमा मयि दोषः स्यादिति भावः
असाधारण्यादि भ्रमदशायां स हेतोरपि या चैर्लक्षणात्वस्वीकारादुक्तार्थाख्यान स संगतमत आह पुनिर्दुक्तेति तेनित सत्वमिति

भावविशिष्टपक्षाभेदस्य हेतौ सत्वेपि हृदोवह्निमान् धूमादित्यादौ धूमादिहेतो साध्याभाववत्पक्षाभेदस्तिरहादव्याप्तिरित्यर्थः सा
ध्याभाववद्वृत्तित्वविशिष्टहेतोरेव व्यभिचारितया तद्भेदस्य व्यभिचारिमात्रे संभवादूषपदेनानुसरणं अत एव बाधितहेतौ ना
व्याप्तिरेव नाप्ययत येति तद्रूपमिति पूर्वेणान्वयः ननु साध्याभाववत्पक्षस्यैव पक्षानिष्ठसाध्याभावस्यापि बाधत्वात् हृदोऽयं व
मानायैव हृदो वह्निमानित्यादिबाधेनाप्याप्रितत्र आह व्यभिचारीति धूमरूपवत्वादौ बहुसत्तानास्पदेधूम इत्यादिः तेन हृदय
कवह्निसाध्यक धूमस्य दुष्टतयाने पापातिसंभवः ननु वह्न्यभाववद्वृत्तित्वमात्रस्यानुमितिप्रतिबंधकत्वावच्छेदकत्वात् द्रव्यस्य धूमे विवहालु
नोति व्याप्तिन आह साध्याभाववद्वृत्तित्याच वह्निव्यभिचारित्वमपि विषयतयानुमितिप्रतिबंधकतावच्छेदकमिति तद्रूपा
माहव्याप्तिप्रसंगो नायुक्त इति भावः ननु तत्क तत्साध्यकहेतुकानुमितिप्रतिबंधकतावच्छेदकत्वं वक्तव्यं तथा च वह्निव्यभिचारि
द्रव्यत्वस्य धूमहेतुकानुमितिन प्रतिबंधकतावच्छेदकत्वाभावान्नातिव्याप्तिरत आह साधारणादिरिति ज्ञानधर्मिकसत्वाभाववद्
त्रित्वमकारकत्वादि व्यापकस्य ज्ञानहेतुधूमक समासाध्यकानुमितिप्रतिबंधकतावच्छेदकत्वान्तरात्व्यापकमाहायसत्वासाध्यकत्वा
नादिहेतावतिव्याप्तिरित्यर्थः ननु वैशिष्ट्यविषयत्वाभ्यन्तरसंबंधेनयोनुमितिप्रतिबंधकतावच्छेदको धर्मः तद्रूपत्वम यविरोधि

Accession No.
~~10466~~ M934
Title - अनुमान गदाधरी
~~मिथिली शार~~
पत्र - 35
(1)
Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामग्रीति विशिष्टपरामर्शत्वेन बाधात् द्विषयकत्वेन चानुमितिप्रतिबंधकत्वात्तत्याव साधारण्यादि विषयत्वस्य तादृशान्यतर
संबंधेन प्रतिबंधेन प्रतिबंधकतावच्छेदकत्वात्तत्तामादायनानियामिः स्वरूपसंबंधेनैव तस्य तथात्वादित्यत आह यथाकथं
चित्तद्वत्त्वमस्येति प्रतिबंधकताकोपि निर्विषयतामात्रेण प्रतिबंधकतावच्छेदकं तद्वत्त्ववस्तो वैयर्थ्यः अतिप्रसंजकत्वादिति पर्व
तोनवह्निमानित्याकारकज्ञानप्रतिबंधकतापात्त्वभावस्यापि प्रविष्टत्वात्तदाश्रयत्वमादाय पर्वतो वह्निमान् धूमादित्यत्र सद्धे
तावव्याप्तत्वादिति भावः ननु वैशिष्ट्यविषयतान्यतरसंबंधेन प्रतिबंधकतावच्छेदकं तत्र पर्याप्तं तादृशाधर्मवत्त्वं वाच्यं तत्र याव
विषयतयानुमितिप्रतिबंधकतावच्छेदकत्वस्य साध्याभावप्रकारकपर्याप्तत्वात्तद्वत्त्वमादायनानियाप्तिरित्यत आह विरोधिसामग्र्या
नित्याव्यावृत्तिः विरोधिसामग्र्या विशिष्टवह्निपरामर्शत्वेन वह्न्यनुमितिप्रतिबंधकत्वाभावेन विरोधिसामग्र्याः प्रतिबंधकतानवच्छे
दकत्वात्तस्य पतितत्वात् सद्धेतावव्याप्तिरिति भावः उक्ताव्याप्तिं निरस्यत्यनुमितिप्रतिबंधकतावच्छेदकपदस्य प्रतिबंधकतेऽत्र्यैतिहा
नेहेतुतानेन चैवेति तथा च स्वलिंगकप्रकारकपक्षकसाध्यकानुमितिप्रतिबंधकीभूतधर्मवत्त्वमेव दुष्टहेतुत्वे तात्पर्यमान
स्य व्यभिचारादेरनुमितिप्रतिबंधकत्वोपगमाच्च न व्यभिचारबाधितहेतावव्याप्तिरिति भावः सत्प्रतिपक्षितमेव लक्षणांसंगमय सम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिभवतिचेत्तिप्रतिबंधकीभूतेतिस्वलिंगेसाध्यानुमितिप्रतिबंधकीभावेनेत्यर्थः कालिकत्वविशेषेणत्र कालीनत्वं कालघटि
तसंबंधेनवै।शिष्ट्यलाभार्थेतद्यासाध्यानुमितिप्रतिबंधःविरोधिसामग्र्याःप्रतिबंधकत्वेसत्येवतदुत्तमाद्यसत्प्रतिप
क्षानस्यसंग्रहःस्यात्तद्वैलक्षण्यसिद्धमित्याहनवैकालेतिक्षणाप्रतिरनुमित्यादिकंप्रतिप्रत्यक्षसामान्यादेश्चप्रतिबंधकत्वस्याव्य
भिचरितोपाधापकतत्तत्सान्निकर्षादिव्याप्तिधेवव्यवस्थापितत्वादितिभावः अनुमित्यादौकथंचिल्लाघवादिसामग्रीत्वेनप्रतिबं
धकत्वस्वीकारेपिसत्प्रतिपक्षस्थलेसाध्याभावानुमितिसामग्रीसत्त्वेसाध्यानुमितिप्रतिबंधकत्वंदुर्घटमित्याहविशेषेतेति
चैतिनसामग्रीप्रतिबंधकेत्यनुषज्यतेसामग्रीत्वेनप्रतिबंधकत्वाभावेहेतुमात्रजन्यत्वइतिसाध्याद्यनुमितिसामग्रीसत्वेसा
ध्याभावानुमितिरुपकार्योत्पादइत्येतदर्थः तथाचसत्प्रतिपक्षस्थलेवबाधस्थलेनेतिभावः ननुविरोधिसामग्र्याःप्रतिबंधकत्वानभ्युपग
मेसत्प्रतिपक्षस्थलेसाध्यानुमितेःकथंनोत्पादइत्यतआहविं।त्वितिततत्रसाध्यानुमितिप्रतिबंधकःमनुसत्यापिविरोधिपरामर्शेसा
ध्याभावव्याप्यवत्ताज्ञानिश्चयद्वयात्पांसाध्यानुमित्यनुत्पादात्तस्यप्रतिबंधकत्वंदुर्घटमतआहयदिचेत्तिमिन्तासाध्यादितिविरोधिपराम
र्शीयसाध्यइत्यर्थःनानुमितितिमयज्ञन्नसाध्यानुमितिबंधकइत्यर्थः विरोधिसाध्यस्यवाधावनावेविरोधिपरामर्शीसाध्याभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवासंजनेनैवनएवनतस्यसाध्यानुमितिप्रतिबंधकत्वं अन्यथानुमितिप्रतिबंधकत्वमिष्टमेवनवैशिष्ट्याशापेनपक्षेद्धिंनद्रभावस्यापिता
दृशा।बाधनिश्चयाभावस्यापितत्रविरोधिपरामर्शाविरोधितायांनिवेशपत्तमितित्वावच्छेदकत्वेनेत्याद्युक्तिःनचैवंविरोधिसामग्र्याः
स्यानुमितिप्रतिबंधकत्वेपिस्वलिंगकानुमितिप्रतिबंधकीभूतविरोधिपरामर्शत्वावत्तामाद्यसत्प्रतिपक्षितेसत्त्वरात्पापत्तेरितितत्रा
हपयाद्येतितथाविधेतिभ्रमप्रमासाधारणोसर्कःअतिप्रसंगइतिपर्यवसितोनवद्रूमाभिसाविभ्रमवज्ञामाद्यपक्षमाद्यतिप्रसंगः
सर्व्यःद्रूषणात्तांनरमाहनवातीतानामितिकालीनत्वमपीतितथाचभिन्नकालीनयोर्वैशिष्ट्यविरहादितिप्रतीतेनसत्प्रतिपक्षितेसद्धेताव
नुमितिप्रतिबंधकीभूतविरोधिपरामर्शत्वंकेनापिसंबंधेननास्तीतितत्राव्याप्तिरितिभावःस्वसमानकालीनत्वानविषयत्वादि
संबंधेनातीतलिंगस्यापिकस्याचिद्विरोधिपरामर्शविस्योपगमेतुपरामर्शनोत्तरजाताहेत्वाभासयामपिसद्धेतोःकालिकादिसंबंधे
नस्वलिंगकानुमितिप्रतिबंधकीभूतपरामर्शतित्वात्तत्राव्याप्तिरित्याशयःसर्वत्रविषयत्वकमेवप्रतिबंधकतावच्छेदकंलक्ष्य
दोषप्रवेशमितिमतंद्रष्टव्यमितिपद्यपित्वाद्दिनाव्याप्त्याद्विकमिस्त्वादिपदेनसाध्याभावव्याप्तिविशिष्टपक्षधर्मत्वादिःपरिग्रहणत्वाप्रति
बंधकतावच्छेदकेनानुसत्प्रतिपक्षितसद्धेतौसाध्याभावव्याप्तिविरहात्तत्राव्याप्तिविरहाहत्वद्धत्वमपीतितनद्दृतानेतिविरोधिव्या एम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यादित्यनेनेत्यर्थः साध्याभाववद्वृत्तित्वं पक्षधर्मिकसाध्याभाववत्त्वादिनिश्चयप्रत्ययेनेत्यर्थः प्रमात्वविषयकत्वेनेत्यभिप्रायो मतेनेन
स्य चेति पक्षधर्मिकसाध्याभाववदित्यादिज्ञानस्य चेत्यर्थः तथा च पर्वतो द्रव्यं धूमादित्यत्र पर्वतो न द्रव्यमित्येवं बाधज्ञानसंबं
धेन द्रव्यत्वाद्यभावस्य धूमे सत्त्वादित्याशय इत्यर्थः ननु यादृशविशिष्टविषयकत्वेनानुमितिप्रतिबंधकत्वं तद्रूपेणैवाश्रयत
याच द्रव्यत्वाभाववद्विशिष्टपर्वताप्रसिद्धेः वह्निनोक्तातिप्रसंगनिरासाशंकते विशिष्टेति न तु साध्यवत्पक्षस्यत्वेऽपि पर्वतो वह्निमा
न् धूमादित्यादौ प्रतिपत्तिनसद्धेत्वाभासत्वातिप्रसंगाद्विशिष्टविषयकत्वेन प्रतिबंधकत्वं निवेश्यापि नु मन्त्राकांक्षामिति त्वाहत
न्किमिति जलत्ववह्निमद्धूमादित्यादौ प्रतिपादितेन साध्याभावव्याप्यवत्पक्षस्याप्रसिद्धत्वात् सर्वत्रैस्तु जं ननु पर्वतो द्रव्यं धूमादि
त्यादौ बाधभ्रमस्य सत्त्वे धूमे मानाभावान्नातिव्याप्तिः विशेषदर्शनमपि विरोधि यत्र भ्रमस्य व्याप्यांधूमादौ सत्त्वमिति पक्षे इत्तोप
मितिव्यवहार एतत्रैव ज्ञानस्य विरोधित्वाद्याद्दैः संबंधत्वकल्पनात्त्रयं बाधितो हेतुरित्यादि व्यवहारो विरहादत आह यथा (3)
कथंचिदिति ज्ञानरूपेण धूमो वह्निव्यभिचारीत्यादिज्ञानरूपेणेत्यर्थः बाधभ्रमस्येव व्यभिचारभ्रमस्यापि युक्तत्वेन संबंधत्वे
मानाभावादत आह तदाश्रयेति व्यभिचाराश्रयीभूतं यद्द्रव्यत्वादिकं तदाश्रयत्वेनेत्यर्थः आदिना कालिकादेः परिग्रह ननु यादृश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संबंधेन पक्षप्रकारकत्वेनानुमितिप्रतिबंधकत्वं नेन संबंधेन पक्षप्रकारकत्वेनानुमितिप्रतिबंधकत्वेनेन संबंधेन तद्वत्तस्योक्तत्वात्
धत्वान्न धूमेति प्रसक्तिरतस्माह यादृशेति न सर्वत्रेति न यावत्पर्वतो द्रव्यं धूमादित्यादिप्रतिपादितेन सद्धेतावव्याप्ति प्रतिबंधकता
नविषयेन समवायादिसंबंधेन द्रव्यत्वाभावव्याप्यगुणत्वादिमत्त्वस्य धूमे विरहादिति भावः पर्वतो वह्निमान् धूमादित्यत्र प्रतिबंधके
नविषयेन समवायसंबंधेन वह्न्यभावव्याप्यधूमत्वादेः साधने सत्त्वात्सर्वत्रेत्युक्तं ननु यादृशसंबंधावगाहि पक्षप्रकारकता
नत्वेन प्रतिबंधकता दृश्या ज्ञाननाद्दृशसंबंधान्यतरसंसर्गकज्ञानत्वं वा व्याप्यमते तेनोक्तस्थलेतिव्याप्तिः तान संबंधेनैव हेतोः साध्या
भाववत्त्वाद्गुणत्वादिमत्त्वादेरत आह अस्तीचेति तेनैव द्रव्यं चेत्यनुषज्यते न यावत्पर्वतो वह्निमान् धूमाद्धूमादित्यत्र बाधबुद्धेः सत्त्व
पादिसंबंधावगाहित्वेऽपि प्रतिबंधकत्वात्तादृशसंबंधेन वह्न्यभाववत्त्वस्य धूमे सत्त्वान्निव्याप्तिरित्यर्थः पर्वतो द्रव्यं धूमादित्यत्र द्रव्य
त्वाद्यभावस्य स्वरूपसंबंधेन धूमादाववसंभवः क्वचिदित्युक्तं कालेयपीत्यादि कृतं छिगत्वे तत्साध्यकानुमितिं व्यावच्छिन्नप्रसे
यत्ता दृशाव्यभिचारज्ञानत्वादिनास्वतः प्रतिबंधकत्वमादायतत्रुटितेत्वज्ञानाभिप्रायेणोक्तमव्याप्यभिचारादिज्ञानस्यापि व्याप्त्या
दिप्रसक्तविरोधित्वात्तद्धर्मप्रतिपक्षमात्रमधिकृत्य यथाकानुपपन्नेरनुमितित्कारणपरामर्शा नरमात्रे प्रतिज्ञाप्रमानपक्षप्रतिबंध राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं स एवं लिंगाभासस्साशये न वा शंकेय मिति चेद्ग्रं बाधप्रतिपक्षयोः प्रसक्त्यादिप्रतिबंधकत्वे हेतुमाह स्यादित्यादि सत्वाभावस्येसा
दिना एवं शाब्दबोधे पि बाधप्रतिपक्षयोः विरोधित्वे आगमेति मलमूत्रपुरीषोत्थितिनिर्गतंत्व शक्तिचिस्मृतमित्यागमस्येत्यर्थः तत्र
यामात्यंगत्वादिहेतौ अनुकूलतर्कस्याभावेपि गृहे स्वतो नुपपोगात् गृहेवस्तुवतरे तिशौ चानुपाने साध्यपसिद्धेरागमप्रमात्राधीनत
याउपनीत्यमात्मीयत्वेनमत्त्व मृत्त्वेत्यागमस्य बलवत्वं बोध्यं अनुपपत्तेरिति तत्र यावत्प्रतिबंधकासत्वात्त्रागमप्रतिरोध इति भावः अ
प्युक्त्येहेतुमाह प्रत्यक्षप्रतिलौकिकप्रत्यक्षं प्रतीत्यर्थः बाधादिरूपादिप्रहेतुग्राह्याभावव्याप्यवत्तोपग्रहः शंकते यो ग्यताज्ञानेतिरद
भवोधनिरूपणाद्यभावः तत्र शाब्दं प्रतिबाधनिरूप्यस्यामान्निबंधकत्वे योग्यताज्ञानोत्तरं लौकिकात्मकबाधनिरूपे सत्यपि शाब्दबो
स्यादित्यादि दोषं स्फुटयति योपेस्याह एवमपीति उपनीतमानविशेषत्विति दोषविशेषाजन्योपनीतभानं प्रतीत्यर्थः तत्वेन बाधनिरूप
याद्यभावत्वेन यद्यपि बाधनिरूप्यप्रदर्शितायामुपमितेः स्मृतेः स्वानुसारात् दुपमितिसामग्रीमत्वपि तद्भावस्य हेतुत्वं वक्तुमुचितं तथा
प्युपमितेरति प्रिय प्रमात्वे विषये पत्तेर्बाधदर्शितायां विशिष्टस्मरणानुसारस्य बोद्धो धकविरहे ज्ञानापि संभवात्तत्र बाधाभावस्य हे
तुत्वे मानाभावदस्ताग्रायः त्वत्त्वरणातः त्वत्तरणावाक्यतः विशेषेतितरवांतरधर्मप्रकारकतद्गोचरत्वानस्येहेतुत्वादिति भावः तद्ध

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टांते स्येतिव स्यमाराख्नन्नराणस्येत्यादिः अतिव्याप्तिरिति यदनीयतेन्वयः तद्व्यावृत्तस्य असाधारणादिव्यावृत्तस्य लक्षणात
रमपीतित्ति प्याचतायें विभागपरोक्ष्यंस्या। किंतु लक्ष्यप्रदर्शक इति भावः मह्वस्रह्तराणप्रत्ययमितितनस्यसामान्यलक्षणातः प्रत्ययमि
त्यर्थः प्रकारांतरेण सामान्यलक्षणस्य प्राक्केहेपश्चात्सामान्यलक्षणोपादानेनस्यात् तस्माकांक्षाविरहादित्साघस्वरसः केचित्तु
व्याख्यावित तः हेतुद्वयसंगसस्येविनक्यतिअनुमितिर्व्याप्तिर्वेतिनन्वेकस्याहेतोर्नित्याद्विभ्रमेणासाध्यतनद्भावोभयसाधकत्वा
दिकस्येत्यादि मूलमसंगतमत आह तदुपधानमिति साध्यतदभावाद्युपधानमित्यर्थः अव्यापकमिति तत्याचपेनव्यभिचारिहेतु
नासाध्यतद्भावयोरनुमित्यादिर्नोसाध्यतिः तत्राव्याप्तिरितिभावः पक्षतावच्छेदकसामानाधिकरण्येनेतरभेदस्य सिद्धेरुद्देश्य
तायामव्याप्तेरहूवणत्वाहाह अव्यापकंचेतित व्याविधेत्तितद्भावीयप्रामितिभ्रमेरोत्यर्थः तद्योग्यत्तेति साध्यतद्भावानुमित्या
दित्वहूपयोग्यत्वेनेत्यर्थः संशयप्रसेवसाधारणादिधर्मवद्धर्मिज्ञानत्वेनहेतुत्वेकोटिद्वयोपस्थापकपदवैयर्थ्यापत्तिरतः संश
यहेतुकोटिद्वयोपस्थितिं प्रत्येवतादृष्येणहेतुत्वं संशयसामान्यंप्रतितितुतद्धर्मिज्ञानंकारणमिति मतानुसारेणव्याचष्टेकोटि
त्यादितव्यावत्समिञ्ज नवक्कंसड्ढकारणमित्यत्र प्रमित्वाद्घटजनकत्वस्यव प्रसक्तेनेपिकोटिकद्वयोपस्थितिद्वारासंशयजनक राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वस्य लाभोप्युपसत्तिवैचित्र्यादिति भावः साध्यसंदेहजनकेत्यस्योपस्थितिक्रियायामन्वयादेव सामान्ये सो समासानिविष्टपदा
नामप्युक्तदिशा व्युत्पन्नत्वं न तस्वीकारेण द्वारत्वलाभो न युक्तः क्रियाविशेषणेनानितान्तत्वसाहस्यादित्तीकन प्रास्तनाप्याभिन्न
द्वौ च द्वितीयान्तत्पुरुषस्येत्यादि स्वाहसाध्यसंदेह इत्यादि स्वाश्रयेति द्वितीयार्थः प्रकारत्वेन ज्ञोपस्थापकपदार्थस्योपस्थापक
ज्ञानविषयस्यैकदेशोऽज्ञाने अन्वितं तेन नैसानि सज्ञानवानयमित्याकारबुद्धेः नादृशज्ञानविशिष्टवैशिष्ट्यबुद्धिरूपायां साध्य
नदभावोपस्थितौ हेतुत्वेन तद्विषये ज्ञानहेतावच्छिन्नाप्तिवारणायेत्यर्थः एकस्य ज्ञानवृत्तेर्निसत्वानिसत्वोभयाश्रयत्वाभा
वादाह विषयितयावच्छिन्नानित्यत्वे साध्ये साक्षस्य स्वाभिचारित्वं न वैरिष्यत एवेत्यतो निसत्वे साध्यास्तु कं समवायेन हेतावति
व्याप्तिमुक्तसंयोगेन साध्यसन्देहेतोर्नमाह अनुवृत्तेत्यादि अनुवृत्तित्वं तदधिकरणाहृतित्वं व्याप्तत्वं च तदभाववद्वृत्तित्वं न
प्यावच्छेदकमपि तद्वृत्तिवद्भावावच्छेदकत्वेनाधिकरणमवानयमित्यनुभवस्य वहिप्ततदभावस्मारकतयानद्विषयस्य धर्महेतोर्विरोधजनकोन
मित्यर्थः तत्योपस्थितेरिति उक्तमेण कोपोपस्थितिरितिरित्यर्थः साधारण्यादिधर्मवद्धर्मिज्ञानजन्यकोठ्युपस्थितित्वेनैव संशा
यहेतुत्वाभावः धार्मिनिति पुनरोपतीवं दंड्वं नवेत्यादिसंशयजनकस्येदंपुरावर्तेत्यादिपक्षधर्मिताज्ञानस्याविषयनामा

हापद्व्यत्वसाध्यकेपुरं …र्त्तित्वादि साद्धेनाव्वत्तित्वान्निवारणायेत्यर्थः तद्धर्म्मितावच्छेदकं असाधारणनयेति नि… तसाध्यव
त्ताकधर्मिकव्याप्तत्वेन तान्नतयेत्यर्थः न चावेपि संग्रहत्वेपि तद्धर्मीर्त्तानैत्यसाधारणपोर्नीर्त्तान्नाहृशायामित्यर्थः विशेषदर्शि
नात् अलस्यत्वापत्तेः न चावधर्मितावच्छेदकपुरोवर्त्तित्वाद्धेत्साध्यवद्यावृत्तत्वग्रहवद्दशायामतिव्याप्तिवारणार्थमेव कोटिद्व
योपस्थापकं पदं वाच्यमिति भावः ननु तद्धर्मिर्त्तानाहृशायां धर्मितावच्छेदकप्रकारकतानस्यासाध्यसंशयोपधायकत्वात् साध्या
त्कुमरात्रानि…मितत्र आह संशयेति तज्ज्ञानवेति साध्यसंशयजननयोग्यत्वेत्यर्थः नन्वेवं साध्यसंशयोपधायकत्वद्वध
र्मिताज्ञानविषयत्वमेव सम्यगिवारित्वादिति द्वां धर्मितावच्छेदकं न्यायतामत्राह अन्यथेति संशयोपधायकत्वस्यानिरुक्तिघट
कद्दयर्थः पयामितिपचापदे साध्यवत्वस्यान्यवत्साध्याभाववत्त्वस्य वनिरूपोवृत्तत्व्यासन्यतिपद्मज्ञानेहेतोः कुत्रापि
धर्मिणि साध्यसंदेहानुपधायकत्वात् ताहशीं साधारणास्याप्रसंगात् ह्यापादिय। न चायनन्तस्य …हायत्वत्पयोग्यत्वस्यापि
वेयो धर्मितावच्छेदकस्यावारणार्थमनदंकोटिद्वयोपस्थापकपदं वाच्यमिति भावः कोटिद्वयोपस्थापकेति द्विलसंवा
नस्येदम… केनापि हि पुक्तं नराह… तिपद्मेत्याहि नायप्रहदति न च… र्त्तान्पांमित्यर्थः प्रतिबंधात साध्यसंशयासंभ राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः फलानुरोधेन साध्यीयप्रामाण्याभावविशिष्टस्यैव साध्याभावपरामर्शस्य वा साध्यवत्ताज्ञानाविरोधित्वमित्याशयादिति
भावः इदमपि साहित्यनिष्ठितत्साध्याभाववद्वृत्तेस्साधारण्यमतेष्वगुणकत्वावच्छेदेन ज्ञानाप्रामाण्यस्य तस्यात्वेन संभवतः इदं च
त्वं न हि प्रपञ्चयिष्यते इति न पाखनित्यानित्यत्ववत्सत्त्ववद्दिदं च गन्धः कमिति ज्ञानस्य निश्चयत्वसंशयजनककोटिद्वयोपस्थापकतया तद्वि
षयीभूतस्य च्युतः कधर्मितोनिश्चयत्वे साध्ये सव्यभिचारत्वापत्तिरतः पक्षतारोपप्रकारकत्वाभावपक्षधर्मतापरामर्शविषयः सं
दिग्धसाध्यकत्वरूपपक्षताविशिष्टपक्षधर्मिणः पक्षपरामर्शविषयत्वे वैयर्थ्यात् तन्निवेशे हि मानाभावस्तादृशपक्षता
संगाह्याहपक्षपरामितिन न पादिपक्षताविशिष्टपक्षतिधर्मितज्ज्ञानप्रवेशस्तथा च तेन नित्यपरत्वेवं वाधान्निर्णयदशायाम
पि निश्चयगगनाद्यनिश्चयगाद्यापक्षस्य ष्टत्ववान्वयाद् इतिज्ञानेन वर्णानिस्योनवेति संशयोत्पादात्तदानीमपि पक्षत्वमसा
धारण्यं स्यादित्याशंक्य निराचष्टेनचैवमिति एवमपक्षत्वे पक्षत्वाप्रवेशे वाधादिसाहित्येनास्वरूपासिद्धिपरिग्रहः अस्य फल
दर्शनवपवेशे वाधासिद्ध्योरनित्यादौ क्षमन्नवद्रिपवसाधारण्योद्धरणा यां पक्षताविरहात्स्वरूपासिद्धिनिर्णयदशा
यां वमपक्षत्वधर्मिविज्ञाताज्ञानाद्व्याप्तिः स्यादसाकेनुतदानीमपि धर्मितत्वेनैव कालान्तरे सपक्षत्वविरहमज्ञानमादाय

तन्न्यूनतासंगमय्यादि भावः ननु घटो नित्यः शब्दत्वादित्यसाधारणतास्थले सिद्धिसंकीर्णतान्नसव्यभिचारत्वमनन्तत्रानित्यानित्ययोरेव सन्न
श्राह अप्रसिद्धिसंकीर्णत्वेनेति बाधसंकीर्णत्वेनेत्यपि द्रष्टव्यं अप्रतिज्ञेतिन यावद्यंश विधत्वव्याघातादिति भावः न चेति वह्निमान् मादे
त्याद्युक्तादौ वह्नितद्भावपवद्भिन्नधर्मवान्यमिति धर्मस्यापि निर्युक्तपक्षधर्मताज्ञानत्वात्तत्प्रकारकधर्मत्वादावतिव्याप्तिरेतस्य चेः
धर्मिताइति किंचिद्धर्मविशिष्टइत्यर्थः तथा ज्ञाननिष्ठं किंचिद्धर्मावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारतात्वं साध्यसंशयप्रयो
वच्छिन्नजनकतावच्छेदकं तद्रूपवत्त्वमर्थः पर्वतत्वावच्छिन्नधर्मिकवह्नितदभावसाधारणत्वावच्छिन्नप्रकारतावत्त्वेन वह्निसंशय
जनकत्वात् तादृशासाधारण्यस्यापक्षमात्रवृत्तितया नो कातिप्रसंग इति भावः अत्र जनकतावच्छेदकत्वं न स्वरूपसंबंधविशेषः साधा
रणत्वाघभावेपि तादृप्यविशेषावच्छेदकत्वं गर्भितयाहि न मात्रपि साध्यसंदेहादर्शनभवापत्तेः किंत्वनतिरिक्तवृत्तित्वं न च साधारणत्वावच्छि
न्नहेतुमत्तासंशयस्य साध्यसंदेहजनकत्वादसंभवः किंचिद्धर्मिकयद्रूपावच्छिन्नप्रकारित्वसाध्यसंशयजनकतायाः स्वमिति अप
व्याप्यजनकरूपवत्त्वस्यैव ज्ञानयदमहिम्नाविवक्षितत्वात् किंचिद्धर्मिकयद्रूपावच्छिन्नवत्तानिश्चयत्वं जनकताश्रयमित्यपाद्य जन
रूपवत्त्वस्यैव साध्यसंशयजनकतानतिरिक्तवृत्तित्वपवसंनुनार्थः पक्षादृसमारणस्य व्याप्यसंशयेन्याद्रियव्यस्य विरोधायेत्र राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिति ध्येयं साध्यसंदेहजनकं मिति कोटिद्वयोपस्थितिद्वारा जनकं मित्यर्थः तेन कोटिद्वयोपस्थितित्वस्यैव प्रक्रान्तत्वात्तेन न विरो
धः नच धूमवान्वह्नेरित्यत्र साधारण्यापत्तिः कुत्रापि वह्नौ साध्यतदभाववत्त्वसंशयजनकत्वस्य तादृशरूपस्याभावादिति वाच्यं साध्य
तदभाववद्वृत्त्यधिकरणतानिरूपकतावच्छेदकधर्मवत्त्वस्यैव साधारण्यात् तथाविधवह्नित्वस्यैव तत्र तत्त्वात् धूमतदभाव
वद्वृत्त्यधिकरणतानिरूपकतावच्छेदकवह्नित्वावच्छिन्नवान्पर्वत इत्याकारकज्ञानादेव पर्वतो वह्निमान्न वेति संशयोत्पादात्
अत एव द्रव्यविशिष्टसत्तादिमत्य सत्तायाः साध्यतदभावसहचरितत्वेपि नातिव्याप्तिः विशिष्टसत्तात्वस्य तादृशाधिकरण
तानिरूपकतावच्छेदकत्वाभावात् इत्थं च काञ्चनमयधूमवान् वह्नेरित्यत्र महानसीयसंदेहप्रयोजकस्य तादृशसाध्यतदभाव
वद्वृत्तिमत्त्वस्याप्रसिद्ध्या न सव्यभिचारो हेत्वाभासः किं तु व्याप्यत्वासिद्धिरेवेति ध्येयं साधारणत्वादित्वादिना साध्यतदभाववद्वृ
त्तित्वरूपस्य साधारणत्वस्य परिग्रहः नचैवं साध्यव्याप्यव्याप्यात्मकासाधारण्यापि साध्यतद्व्याप्यवृत्तित्वांशस्य तत्रासत्त्वा
दिति वाच्यं तद्घटकज्ञानस्य केवलान्वयिसाध्यके त्वादिना माणिक्ये नैवायेक्षसमारणात् इति भावः ननु यत्र सविषयकत्वान्नित्य
यदृशायां इदं सविषयकं न वेत्याकारकः संदेहः सविषयत्वज्ञानं सविषयत्वाभाववन्निसविषयत्वप्रकारकं न वेति भ्रमत्वसंदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेतूपासाध्यतदभावोपस्थितिः न च ज्ञानकीभूतस्य अप्रमात्वे तदभाववद्वृत्तिज्ञानमित्याकारकप्रज्ञधर्मतोज्ञानस्य विषयत्वान्वेस
द्धेनावनिश्चायासिरत आह इदमित्यादि विषयितात्वस्य साध्यतावच्छेदकीभूतस्यानुगतत्वे विवादात् साध्यान्तरमाह अन्यद्वृत्तीति
अप्रामाण्यसंदेहस्येति अप्रमात्वसंदेहस्वरूपः प्रामाण्यसंदेहस्येतियावत् अप्रमात्वं च ज्ञानविरहधर्मिकोक्तिः प्रामाण्यसंशयावो
ध्यः न स्येव साध्यतदभावोपस्थितित्वसंभवादिति ध्येयं तद्घटकेति अप्रमात्वरूपाप्रामाण्यघटकीभूते स्वार्थः ज्ञान विषयइति अप्र
मत्वतदभाववद्वृत्तित्वज्ञानत्वेऽपि इदंज्ञानमित्याकारकज्ञानस्य विषये इदंत्वस्य सर्वैः साधारण्यादिति अतः तदभाववसहचरितधर्मिकज्ञानस्य
नाप्रसिद्धधर्मवत्ताज्ञानम् अप्रमात्वतदभावोपस्थितेर्वृत्तितदभावकोटिकसंदेहजनकत्वरूपेण सर्वैः न तु ज्ञानस्येति अप्रमात्वसंदेहात्मकसा
ध्यतदभावगोचरज्ञानस्य यज्ज्ञानसाध्यसंदेहत्वावच्छिन्नं यत्स हेतुत्वादिरूपैः न चैवं निष्प्रकारकप्रामाण्ये ज्ञानेऽप्रामाण्यघटित
अप्रमात्वस्य संशयापादकत्वादिप्रामाण्यसंशयः तदुत्तरं निर्णीततद्घटकत्वादेः धर्मिणि संदेह अनुकूलस्यादत आह प्रामाण्यसंश
यस्य लक्षणे इति न च तत्रापि प्रामाण्यादिनाघटितअप्रमात्वस्य संदेहे न प्रामाण्यादिसंदेहस्य कारणं किं तु प्रामाण्यादेः साधा
रणधर्मवज्ज्ञानमेवेति भावः यथा श्रुतीनि श्वयोजनार्थ संदेहं प्रत्यन्वयव्यतिरेकाभ्यामेव प्रामाण्यसंदेहः कारणमप्रमा राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनापिप्रामाण्यसंदेहंधूमादिनानिश्चितार्थसंशयापत्तेरतआहप्रामाण्यसंशयेत्यनंतरंपसारेरोत्पित्यान्द्वाविरोधिनोविष
यनिश्चयस्यसत्वेनसंशयोनसंशयोनुपपन्नइत्यप्रामाण्यापत्तेनविषयनिर्णयस्यात्रमलशंकाशून्यत्वरूपंयत्प्रतिबंधकताव
च्छेदकंतदपसार्यगइत्यप्रामाण्यापन्नानायेत्येतिभावः ननुपर्वतादिधर्मिकवह्निमत्त्वादिसंशयतिवह्निव्याप्यत्वावच्छिन्नप्रकारता
कसंशयस्यहेतुत्वात्तानहिव्याप्यत्वावच्छिन्नप्रकारताकसंशयस्यहेतुत्वातिव्याप्तिः नचवह्निव्याप्यत्वावच्छिन्नप्रकारकत्वस्यसा
ध्यसंशयजनकेव्याप्यवत्तानिश्चयेपिसत्वात्साध्यसंदेहजनकतानतिरिक्तवृत्तित्वलक्षणानिजनकतावच्छेदकत्वाभावादे
वनातिव्याप्तिरितिवाच्यंवह्न्यादिसंदेहंप्रतिजनकव्याप्यादिव्याप्यप्रकारकज्ञानत्वेनैवजनकतयावह्न्यादिव्याप्यवत्तानिश्चयस्यापिवह्न्या
दिसंदेहस्वरूपयोग्यत्वात्साध्यसंदेहमात्रेस्त्वेवसाध्याभावविशिष्टबुद्धित्वानतरवच्छिन्नंप्रतिसाध्यव्याप्यवत्तानिश्चयत्वे
नप्रतिबंधकत्वादेवतयाव्याप्यवत्तानिश्चयसत्वेसाध्यसंशयानुत्पादसंभवादाहव्याप्यवत्त्वेनिरवमतेपिव्याक्तासशायस्यवि
शेषणतानानादिविषयताव्यापकवतासंशयहेतुत्वादाहपृथगितिव्याप्यवत्वावच्छिन्नप्रकारताककत्वेनतिनदर्थः कोटिद्वयो
पस्थितिद्वारासंशयजनकत्वस्यैवप्रामाणिकत्वात्पथगिसस्यकोटिद्वयोपस्थितिवार्थःसाधारणादिधर्मवद्धर्मिज्ञानस्यैवसं

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रापज्ञनकत्वं सत्रधर्ममतः पक्षस्तुत्कं निम्नप्रपरामितिनप्यावधर्मितापद्रूपावछिन्नकारतानाक निश्चयपत्वं निश्चयपलाव
छिन्नायास्साध्यसंदेहजनकतायाश्चनतिरिक्तवृत्तितद्रूपवत्वं विवक्षितं व्यापकसंदेहं प्रतिव्याप्यवत्ताज्ञानत्वेनैवजनकत्वेननुतन्नि
श्चयपत्वेनेतिनातिप्रसंगइतिभावः नकेवलमेतावसद्धेतुनिरासाद्धेत्वभिमतपदंप्रपतनस्याह हेत्वभिमतेनेतिहेतुताघटकेनस
र्वःनयावयादृशसंबंधेनयद्रूपावछिन्नवत्वज्ञानेसाध्यसंदेहप्रयोजकंतादृशसंबंधेनहेतुतास्यलरावनद्रूपवत्वं सव्यभिचा
रः अयमात्माज्ञानादिमान्हेतोःसमवायेनज्ञानस्यहेतुतास्यत्वेनसाध्यतद्भाववद्विषयकत्वावछिन्नज्ञानवत्तायाःसमवायेनज्ञा
नेनसाध्यसंदेहजनकमतोनातिव्याप्तिः विषयतासंबंधेनतादृशज्ञानवत्त्वज्ञानस्यसाध्यसंदेहजनकत्वाभावेनतनसंबंधेनज्ञाना
दिहेतोस्सव्यभिचारत्वमेवेतिभावः आत्मत्वज्ञानेकाद्दक्तिलपहेतत्साध्यकज्ञानहेतोः सव्यभिचारत्वमिष्टमेवेत्यतआहकपालत्वा
दिहेतौतन्संदेहजनकइति आत्मत्वादिसंदेहजनपक्षधर्मताज्ञानविषयेसत्यर्थः ननुजनकत्वस्यव्याप्यवृत्तित्वात्कोटिद्वयोपस्थिति
जजनिकायाविप्रतिपत्तेः प्रसेकपदार्थघटेहेनतद्भयोपस्थितिजनकत्वाभावासंभवाद्विप्रतिपत्तिरिक्तसाधारणत्वासंगतिरतस्तद रामं०
भिप्रायेणप्रकाशयतिविप्रतिपत्त्याविति प्रसेकसाध्यवाचकप्रसेकपदस्यनद्वारत्वं विप्रतिपत्तिघटकपदस्यवारणंनयाचविप्रतिप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिः प्रमेयं न नच घेतिविप्रतिपत्तिनकोटिद्वयोपस्थापकैकरूपद्वयपर्यवसीय चेः ननु प्रमेयकपदस्य कोटिद्वयोपस्थापकत्वाभा
वेपि समुदितानां विप्रतिपत्तेस्तथात्वात्तत्राभिप्रायोऽलिखेवेत्यत आह भिन्नेति नच्छेत्याज्ञानं विप्रतिपत्तिमत्ताज्ञानं न न च यानकोटिद्वयो
पस्थापकं स्वरूपतो ज्ञानाज्ञानयोर्विप्रतिपत्तिविषयत्वेन व्याख्यानं न व्याचपत्नधर्ममज्ञाज्ञानपदेन दूरगमेन दृष्टिमायेरोवनवायप्रज्ञप्तिरि
तिमूलाज्ञिरिति भावः ननु प्राप्यः नित्सोन वेसाहित्यान्सेवनाहृदशावाक्षस्यापितानं कोटिद्वयोपस्थापकं मवलोवनव्यायतद्धु
ठकीभूनमप्रसेकयहार्थवमाज्ञानमप्येवं नन्याचाविप्रतिपत्तौ नहुठकप्रमेयकपदस्यानित्याभिरेवेत्यत आह नवेति विप्रतिपत्तिमत्ता
ज्ञानस्य न हुठकप्रमेयकपदस्य ज्ञाज्ञानस्य चद्वयोर्मिलितत्वाजनकत्वं न विप्रतिपत्साहि मज्ञाज्ञानत्वेन कोटिद्वयोपस्थितिं प्रतिजन
कत्वेन व्याचधर्मिणी वद्धज्ञाज्ञानत्वे कोद्युपस्थितिजनकत्वं नत्वं मेव सम्यगभियारत्वं विवक्षितं नच विप्रतिमज्ञाज्ञानत्वेन नपा
त्वंप्रत्येकार्थोपस्थितिं प्रतिप्रमेयकपदज्ञानत्वेन वहेतुत्वावतोनातिप्रसंगः ननु वेध्यत्वाहिसंबंधेन साध्यतद्भावसहचरित
विप्रतिमज्ञाज्ञानत्वेन ज्ञानदृश्यो कोटिद्वयोपस्थितिजनकत्वाद्युनक्के मेणापि विप्रतिपः जिवारत्तांद्युघट मत आह न व्यालेपीति
विप्रतिपत्साहि मज्ञाज्ञानत्वेन कोघपस्थापकत्वेपि वेत्पर्थः न याच प्राप्तो नित्सशाषृनित्सोनवे निवाकावकन्याहिस्पाद्दैवोध्यत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिसंबंधेन हेतुतायाः निमग्निपत्तेः सव्यभिचारित्वमित्थमेवेति भावः ननु विशिष्टधर्मिकसाध्यसंदेहदशावच्छिन्नस्य साधारणादेरे
वानुपसंहारित्वाज्ज्ञानीयं न कुत्रापि साध्याहिमत्त्वनिर्णये कारणाबाधान्न साध्यतदभावसहचारित्वनिर्णयासंभवेन तस्य संश
याजनकत्वापयोगात् न तत्राप्याप्तिरित्यनत्रानुपसंहारित्वेनिरुक्तक्रमेणान्तिसंदेहादिजनकयोग्यतायाएव लक्षणघटकत्वेनेत्यर्थः
सर्वधर्मिकसाध्यसंदेहदशायामप्येवं साध्यस्य तदभावस्य वाऽप्रसिद्धिकरणात्त्वनिहेतुमानिसाकारकस्यैव साध्यसंशयजनकपक्ष
धर्मताज्ञानस्य संभवान्नानुपसंहारित्वव्याप्तिरिति प्राचोमतमुपन्यस्यानिके विविविति अनुरूपादित्ति साध्यसंशयस्येसन्नुषश्यने
निश्चयपक्षमित्यस्य साध्याहिमत्त्वांशारसादिः तेनापरांशे नियपक्षत्वस्यापेक्षायामपि न क्षतिः गोत्वादिति साध्यवत्त्वांशे निश्चय
त्मकमनुभयसहचारितत्वप्रकारकज्ञानत्वेन हेतुतायां गोत्वादित्वस्य र्थः तत्संशयेतिसाध्यवत्तासंप्रायेसत्त्वप्रायात्मकसाध्यतदभाव
सहचारिताज्ञानादित्यर्थः तथा चाप्यनुपसंहारितादशायामपि निरुक्तकोटिकपरस्यापकत्वमित्यर्थः लाघवेन विशेषोपेक्षितस्य वि
षयता पर्याप्तिमत्त्वव्यसाध्यतदभावसहचरितहेतुमत्ताज्ञानस्य साध्यसंदेहजनकत्वात् साध्यांशे संशयात्मकं सहचारिताज्ञानेन
साध्यसंदेहहेतुर्विशेष्ये विशेषणामिति रीत्यादि विषयतायां प्रमाणाभावादित्याशये नाह तच्छिस्यामित्तिनत्वेसादिके चिदि राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वविशिष्टाभावमसिध्यैवचकथं तन्मात्रातस्य मतञ्चाह । विशिष्टस्येति अभिधेयत्वाभावप्रतियोगिविशिष्टस्य संबंधविधयाभानेतस्याप्र
सिद्धत्वप्रत्यक्षेणारितिभावः व्यवहारौ पक्षस्य मूलोक्तस्य सत्प्रतिपक्षस्य स्वरूपसत एवानुमितिविरोधित्वान्नाभासत्वमतः स्वरूपमेव
हेत्वाभासत्वं यन्त्रमुपदर्शयति सत्प्रतिपक्षेति आभासित्वमुक्तं इत्यादि यत्र विशिष्य पक्षापेक्षया साध्याभावव्याप्यत्वमेव लघुत्
त्रे पक्षधर्मिकत्वहतानिश्चयत्वेनैवाभानेनैवं धर्मकत्वाभिप्रायस्य पेनह साध्याभावव्याप्येत्यादि यत्र साध्याभावव्याप्यवत्तामपेक्षया वि
शिष्टपक्षस्यैव लघुत्वं तत्र साध्याभावव्याप्यधर्मिकपक्षानिश्चयत्वेनैवतावत् बाधविरोधित्वमिति आशयेनाहापक्षेति पक्षाभावे साध्याभावसा
ध्यवत्त्वे ह्ययोरप्याप्यावित्यर्थः एवमादिरित्यादि साध्याधिकरणत्वाभावव्याप्यवत्पक्षस्याप्युपग्रहः नचैनेषामसत्प्रतिपक्षस्य विभाजकत्वे हेत्वाभा
सानामपञ्चविधत्वानुपपत्तिरत आह विभाजकत्वेति महत्ते साधिकहेतौ वह्निमान् धूमादित्यादौ साध्याभावव्याप्यवत्पक्षस्य वारणाय स
त्वं नेमहत्तत्वयोः पक्षसाध्ययोः वैशिष्ट्यग्रहविरोधित्वे सतीति नह र्थः अत्र महत्तत्व पक्षधर्मिकमहत्तत्वसाध्यकत्वग्रहविरोधित्वं नाह
याग्रहजकीमत्ताभावप्रतियोगिज्ञानविषयतामात्रेण व्यासज्यवृत्तित्वं वारणाय पक्षसाध्याभावव्याप्यव्याप्यवत्पक्षस्यैव व्या
वर्त्तनानुपपत्तेः तज्ज्ञानस्यापि तत्पाकावगाहिमहत्तत्वसाध्यकत्वासमुदायत्वेन विरोधित्वात् नापि महत्तत्व पक्षक महत्तत्वसाध्यकत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्वावच्छिन्नप्रतियोगिताकत्वविशिष्टविषयकत्वेनप्रतिबंधकत्वेनत्वमेवतथापिनिर्वह्निर्वह्निमानितत्वाद्धिंसाद्यौपक्षतासाध्यवत्तयापक्ष
तपक्षसंग्रहस्यशाहार्यत्वात्‌ताद्दृशग्रहस्याछिन्नप्रतिबंधकत्वाप्रतिबंधकत्वासिध्यातत्रपसत्प्रतिपक्षाख्यादे:प्रकृतपक्षसाध्यग्रहावि
रोधीत्वस्याप्यनुपपत्तेश्चकिंतुप्रकृतपक्षप्रकृतसाध्यवत्ताग्रहत्वाव्यापकविषयपिप्रत्यग्रहंप्रतियाद्दृशाविशिष्टविषयकत्वेनप्र
तिबंधकत्वेनत्वमेवतथायंतथाविषयिताप्रामाण्यस्यैवयथा कथंचित्साध्यविशिषपक्षग्रहत्वाव्यापकत्वात्तुप्रग्रहाप्रसिध्यालक्षणा
संभवश्चैव:स्यात्‌तपक्षसाध्ययो:प्रकृतत्वोपादानंएवमुमरत्रापिवोध्यंकांचनह्रद:कांचनवह्निमानधूमाद्दित्याद्यौकांचनत्वाभावव्या
प्यवत्पक्षाद्यैतरत्तार्थमविरोध्यंनमुनापक्षस्यविशेषणेनतह्रदोवह्निमानधूमाद्दित्याद्यौपक्षतपक्षसाध्यग्रहविरोधित्वाप्रसिध्यत
त्रसप्रतिपक्षत्वाप्रसिद्धपक्षसाध्यस्थलेताद्दृशग्रहाविरोधित्वविरोधस्यानुपादेयत्वात्समानविशेष्यकत्वप्रसाससाप्र
तिबंधकत्वमतेह्रदस्वाद्दिप्रकारकग्रहत्वावच्छिन्नंप्रतिह्रदत्वमिन्नत्वाद्दितानत्वेनसमानविशेष्यताप्रतिबंधकत्वात्तत्रापिसाधनाद्दिप
हविरोधित्वप्रसिधे:संभवाच्चनचवाच्यम्भावव्याप्याभाववत्त्वर्वतोवह्निमाद्दित्याद्यौपर्वतत्वावच्छेदेनवह्न्यभावव्याप्यवत्त्वस्या
पिप्रतिपक्षत्वात्तत्राव्याप्तिस्तस्यप्रकृतपक्षेग्रहविरोधित्वाद्दितिवाच्यंतत्साप्रव्याप्तिध्येनतलक्षत्वेपिसत्संभावात्पर्वतप्रकृत राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपस्यैव विशेषणतामविरोध्यंतं तन्यायेनोक्तप्रतिपक्षस्थलेऽपि तद्विरोधिरूपस्य प्रकृतसाध्याभाववत्त्व
स्यपक्षेतत्पक्षग्रहविरोधित्वानाव्याप्तिरिति तंत्रन्यासस्तिवत्सभाव्याप्यव्याप्याभाववान् पर्वतो वह्निमानित्यादौ वह्न्यभावव्याप्यव्या
प्यवान्पर्वत इत्यादिकायामाश्रयासिद्धावव्याप्तिप्रसंगात्तस्यापि प्रकृतपक्षग्रहविरोधीयः प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिवह्न्यभा
वव्याप्यवत्त्वसर्वंतात्मकयत्तिपक्षस्तत्त्वज्ञानायकत्वादिति ध्येयं पर्वतो वह्निव्याप्याभाववान् धूमादित्यादौ वह्निव्याप्याभाववान् धूमादित्या
दौ व्याप्तिव्याप्यवान्पर्वतोत्मकबाधेनिव्याप्तिवारणाय समाहग्रहतेसादित्यत्रापि पक्षसाध्ययोग्रहे नत्वोपादानमसंभववारणाय
निमागेवोक्तं ननु ज्ञानरूपेणापकत्वं यादृशज्ञानहेतुबाधिविषयकत्वं तदोपदृष्टितज्ञानस्यापि कथं बिरुद्धघोषणात्तानादिविरोधिधीयापवहे
स्वानत्रानिव्याप्तिनाहवत्त्वस्य मतत्राह ननु तेनापकत्वं चेति अनुमितिजनकत्वमीति निरुक्तविरोधिरूपगोचरानुमितिजनकत्वमित्यर्थ
तेन वह्न्यभावव्याप्यवत्ज्ञानस्य नोबाधस्यापि वह्न्यभाववाक्यं अनुमितिजनकत्वानन्तत्रातिव्याप्तिनाहवस्थन चैवं ह्रदो वह्निमानित्या
दौ साध्यासमानाधिकरणधर्मवत्त्वस्य व्याप्तिमित्तस्य साध्यविधुन्यापकत्वादितिवाच्यं तस्याविरोधित्वेनालक्ष्यत्वादिति भावः पक्ष
धुलक्षणं ग्राहयति तच्चेति नाद्रव्यो विशिष्टं द्वेस्यः पक्षादिकमित्यादिपदेन साध्यवत्त्वज्ञानत्वव्याप्यवत्त्व ज्ञाद्युपग्रहः ननु तत्त्व

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शादिः शब्दत्वादित्यादौ साध्यव्यापकीभूताभावप्रतियोगीहेतुमत्पक्षस्यापि पुत्ररूपकत्वात् तत्रातिव्याप्तिस्तस्य मणित्वाक्रमणे तत्र साधारण
त्वेन समनैव विरोधित्वेनालक्ष्यत्वात् तत्राह असाधारण्येति किंतु कोपाया धर्मोरसाधारण्यात्वेपि न तस्य प्रतिपक्षविधया दोषत्वं किंतु मि
थ्याभिग्नहप्रतिबंधकत्वेनैवेति मिथ्यात्वे अव्याप्त्यसंभवानुपक्षाहसमुक्तं प्रतियोगीत्यादिस्वाद्विनासाधनतावच्छेदकादौ ताव्याप्तः शक्ति
योगीनावच्छेदकत्वाद्युपपद्यतान्नतु प्रकृतसाध्याभावः व्याप्यवत्प्रकृतन पक्षएवास्मत्प्रतिपक्षसाध्यवत्तावृत्तौ न व्यमनेन तस्यैव विरो
धित्वान व्याचप क्षनिष्ठस्य साध्याभावव्याप्यादेरनुगमार्थं विरोधितयो नापकलघटितं लक्षणोक्तम् इत्यमिनत्त्वाह संग्रीक्षतेनैवेति अस्य
व्याप्रकृतसाध्याप्रसिद्धा तत्रस्यापतिम क्षोयग्रहोनस्यादिति भावप्रसंगादाह सत्प्रतिपक्षेत्रेति यथा सिद्धांतमिति वौधौरह स्या
देहुयस्यामि मांसकै प्रतिता दित्रयस्यमावीनैकंदकोटकोधालाका तर भावेनाव्यपरात्र वाकस्यनैपाधिकैस्त्र प्रतिताहिपेवक
स्यम्यापक्षोपगमादिति भावस्यापनानुमानेदोषाकांक्षायां अभिवारादिरिव साध्याभावव्याप्यवत्पक्षत्वमनः प्रतिपक्षस्यैव
प्रथममुपन्यासादहत्वादिति भावः प्रत्येकं समर्थत्वप्रतिदोषत्वेत्ररसप्रति विशिष्टपरामर्शेति विशिष्टाभावस्यप्रतिविशिष्टपक्ष
धर्मत्वाभावस्यसमर्थः दुर्वारत्वादिति तथा च विशिष्टाभावस्यापि दूषणसमर्थत्वात्प्रसवेन तथापि सिद्धीरि जभावः प्रसक्ताभाव राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दसाधारणाद्स्यर्थः । तेन हेतुमत्ताविरूपाद् । संयोगादिसंबंधेन हेतुतापामसाधारण्यं नन्वेवमसन्निहितो । पक्षाद्वृत्तित्वमावश्य
कमतः स्वरूपासिद्धिरेवास्तु दोषादस्यते अस्माहपक्षाद्वृत्तिमेति अत्संकरः स्वरूपासिद्धानतु हेतोः पक्षमात्रवृत्तित्वमन्मदृश्या यां सा
ध्यानदभाववद्धाद्वृत्तित्वतानमेवर्धिठं वृत्तिमत्वतानस्पतादृश व्याद्वृत्तत्व घी विरोधीत्वाद्राह न चेति स्वरूपतोऽग्न्यासाभाव । वि
धयाव्यावर्तकधर्माविधया तद्वृत्तिमत्वस्पतानेनसार्वत्रिकमितिभाव । ननु साध्यवत्पानिष्ठितद्वाहजत्वमेवसंदेहप्रयोज
कं ननु साध्यतदभाववद्वृत्तित्वमत्रापद्दृष्टे व्यतिरेकित्वं स्यात्तस्य तत्वमत आह । निष्ठितेति नि । श्विवेतौ निष्ठ्य पसानौ साध्यतदभा
वौ येषु तद्व्यावृत्तत्वं चेत्यर्थः एवमग्रेऽपि न चात्र संशयप्रयोजकत्वेऽनतिप्रसंगादिति अनैकान्तिकत्वप्रसंगादित्यर्थः । ननु सा
नौ साध्यवद्वृत्तित्वोऽग्रहे बाधकाभावादिति भावः । तादृशेति साध्यादिमत्तानिष्ठ्य येत्यर्थः । तथा च साध्याभाववत्तिन्निष्ठ्य येतिविशे
ष्यावृत्तित्वेऽपि साध्याभाववद्वृत्तित्वाविरहादेव सद्धेतौ नातिप्रसंग इति भावः । प्रतिबंधेरनुगतत्वानतराह । किं चेति विशेषणा
त्वज्ञानीयस्य पक्षसाध्यसंशयप्रयोजकरोऽपवत्वं तदेव सोऽनैकान्तिकत्वस्युक्तावित्यर्थः । महानसादिवृत्तित्व्याचधर्ममवान्व
न संयोगेन द्रव्यादोव न संयोगित्वेरासभादेहेतुतापामव्याप्तिः साध्यतदभाववद्वृत्तिनावच्छेदकीभूतस्पवन संयोगित्वस्य प

(12)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२

हानवृत्तिता इत्यायां तसमभावसंभवादिति भावः अनित्यापत्तिरिति नित्यपक्षकायामपि काललाभेन निर्णीतसाध्यादिमत्ताकत्वद्
र्मिव्याप्तत्वानपायादिति भावः ननु पक्षाभासमात्रस्यैव नित्यदोषत्वेन तदा असाधारणप्रकरणसमयोरनित्यदोषत्वाभिधानं
यत्केवलमसंगतमत आह व्याप्तिपक्षे असाधारणेति अनित्यदोषत्वं पदि नित्यदोषत्वाभावः तद्धि नित्यपदंधर्ये दोषत्वाभावस्यैवप्रह
त्वादत आह विशेषादर्शनेति असाधारणादिभ्रमस्य तत्वात्ग्रहह व्यापाभित्यर्थः अन्यथा साध्यकलस्यावतारणार्थं पूरपत्ति
ननु व्याप्तत्वदोषत्वमिति मूले अभेदानुमान इति इदमाकाशाभिन्नं प्रमेयत्वादित्यादौ केवलेद्विनयापि साध्याव्याप्तिनिश्चयस्थले तदानीं साध्यन
दभावव्यवृत्तित्वे हेतोः व्रहात्साध्यसंदेहापानुत्पत्तरव्याप्तिरित्यर्थः ननु कृतहेतुरूपस्य यतएव साध्यसमानाधिकरणत्वात्मा
ध्यवद्वृत्तित्वे सति कलासंगतिरतः प्रामाणानुसारेणाव्याप्तपक्षे अनुवगतेत्यादि अनुपसंहारिणोप्यनवगतसाध्यसहचारकत्वा
त्तद्वारणाय विशेष्यविरुद्धत्वेपि सव्यभिचारसंभवात्तन्मात्रोक्तस्यापि नदूषणाभ्युपगमे नोक्तदर्थः बलवत्तरेति तदानीं साध्यसहचारा
नुमानादेपि न अतद्धेतुत्वेन कतावच्छेदकोभूते असाधारणत्वमादायैव तत्र लक्षणसंभवादिति भावः वस्तुतः पुमेयत्वस्य एकदेशिकात्य
न्यतरस्यत्वतारान्तेन हेतुतास्थले एवाव्याप्तिमाशंक्य तयोरुक्तपत्वं मूलकृतोक्तमिति यथाश्रुतमेवसम्यगिति पुनरनुसंधेयं राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यत्र विरहान्नस्यादिति भावः परामर्शविशेष्याभावत्वं परामर्शविषयाभावत्वं परामर्शविशेष्यप्रतियोगिकाभावत्वं तादृशविषयत्वावच्छि
न्नाभावस्यासिद्धत्वाद्यसंभवात् अनाभास इति अतिप्रसंगस्याग्रेऽन्वयः स्वमध्येपि सद्धेतावपि तथाविधस्य साध्यतावच्छेदकादेरभाव
सत्त्वादिति भावः बाधविशेषस्तिय स्थानिष्ठसाध्याभावात्मनुबाधस्याभासत्वात्परामर्शविषयकप्रतियोगिताभावत्वादिति भावः स
ध्याभाववत्त्वस्य स्थानान्मनो बाधस्य तादृश्या विषयाभावस्य विरहात् तत्रातिव्याप्त्यसंभवादिह शोभपदं विशेषितं चेति तादृशाविरोधिसमान्न
प्याभिचाराद्यतिप्रसक्तेरादिति भावः ननु यदंशपत्त्वेन विशेषणतानाप्तिप्रसक्तिरत आह अप्रसक्तेर्चेति य स्थादिरिति पक्षादेः परामर्शवि
षयप्रतियोगिकाभावस्य विरहादिति भावः आदिपदात् स्थानावच्छेदकाभाववत्त्वस्य स्थादेः परिग्रहः अत एव साध्यतावच्छेदकाभाववत्त्वस्य स्थादेरव्या
प्तेरेव शाब्दमात्रेति यत्कृतत्वेरननुगमादव्याप्त्यसंभवादिति भाव ४ सव्यभिचारादिसाधारणाविरोधी गृहः तत्पक्षत्वेन सव्यभिचारः द
न्यपक्षेन निरोधदर्शादिदृव्यत्वे साध्यहेतुनि घपेवसाध्याभावः वह्नित्वमप्रसिद्धेन तत्तन्मात्रेप्रमेयत्वसाध्ये नु तदप्रसिद्धेमि साध
येन साध्यानन्तरमाह प्रमेयोयवेति अयश्चयातिद्धिसंपादनाय नित्यसोपाधिनेतरस्यैति तत्र मे स्यन्न तत्सदृश्यपयोर्थव्याभिचारादिनश्च प्रसि
द्धिरिपर्थः नव्यायनत्रेसाश्रयासिद्धाद्यव्याप्तिरिति भाव ४ साध्यस्यापि विशेषतानो माबाधेतिव्याधमापातिरत ४ स्यान्तेत्रियेगा

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२

साध्याभावगाहित्वं निवेशयन्नाह साध्यताविच्छेदकेत्यादि साध्याभावगाहीतीति प्रकृतसाध्याभावगाहीनस्ताहृशा विशिष्टज्ञानस्य विरोधित्व
मित्यर्थः साध्यव्यतिरेकसामानाधिकरण्याभावमात्रस्य व्यभिचारत्वप्रागभाविनत्वात् पक्षेति त्वाविशिष्टेति आदिना पक्षवृत्तित्व
विशिष्टव्यतिरेकव्याप्त्याद्यभावस्योपग्रहः नचैतत्वाच्यमिथ्यन्वयः तत्र सिद्धत्वं पक्षमव्याविरोधित्वमात्रे साधारण्याद्यतिप्रसक्तमतः स
त्वेनेत्युक्तेन पक्षप्रकृतसाधनयोर्वैशिष्ट्यस्य ग्रहेतसाध्यहेतुमत्त्वावगाहोक्तौ साध्याप्रसिद्ध्याद्यप्रामाण्यतो ह्यपत्वयोग्यहत्त्वहृविरोधिसंदेहा
व्याप्तिग्रहविरोधितत्वमत्वैसानिसर्थः केवलस्य व्याप्तिग्रहविरोध्यतत्त्वमत्वशोक्तौ साध्याप्रसिद्ध्याद्यप्रामाण्यतो विरोधित्वात्तं प्रकृतपक्षसा
धनयोर्वैशिष्ट्यस्योक्तेः फलमाह विशिष्टपक्षेत्यादिना संग्रह इति वाद्नि महत्त्वतिस्वविशिष्टद्रव्यत्वस्वरूपायास्वरूपासिद्धेः साध्यसामानाधिक
रण्यांसेव्याप्तिग्रहविरोधित्वेपि प्रकृतपक्षसाधनवैशिष्ट्यग्रहविरोधित्वाभावात्तद्विरोधिमत्वव्याप्तिग्रहविरोधियतत्त्वमत्वस्य नत्र सत्यादि
तिभावः ह्रदयपक्षेवह्निसाध्यकधूमस्यास्वरूपासिद्धिमात्रेकांचनमयपर्वताक्रिसाध्यकतुव्याप्यत्वासिद्धेरपि साध्याप्रसिद्धिसाधन
प्रसिद्ध्याद्यपि वेति साध्यसाधनयोः कांचनमयपक्षोलिवैः साध्यविशेषणासिध्यादेर्वव्याप्तिग्रहविरोधिनः प्रसिद्ध्यात्महानताइयोति
प्रकृतपक्षसाधनवैशिष्ट्यग्रहविरोधिन इसपति अन्तरसनेनपक्षन्तेप्रदायासिद्धपाठोलिख्यते साधारण्यकाप्यितानामा राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारणतयानुपसंहारित्वाभिन्नं तेन ज्ञानस्य विषयतया परामर्शविरोधितावच्छेदकं रूपमसिद्धिः यत्र साधारणतादिकमप्रसिद्धं तत्र च व्य
भिचारित्वस्य त्वथा नत्वहेतुत्वात् द्वितीये यत्र साधारणतादिकमेवासिद्धिः तत्र न हेत्वाभासत्वेनोपादेयं शब्दानुगमस्याविवक्षितत्वात् परामर्श
व्याप्तिव्यतिरेकतो वा उपादेयानां तौ व्यतिरेकव्याप्तिविशिष्टपक्षधर्मताभावाद्यावद्व्यासज्यः साधारणत्वाद्यनिरूपितेन तया ज्ञानस्य विष
यतया परामर्शविरोधितावच्छेदकरूपं वासिद्धिः अत एव द्रव्यत्वाव्यभिचारिगुणाद्व्योभयसमवेतत्वेन वा न द्रव्यत्वसमानाधिकरणोभय
वेतत्कर्मसमवेतत्वान्वाद्ययोर्द्रव्यं सत्वात् द्रव्यकर्मासमवेतसमवेतत्वात् द्वैसाद्वै गुणाद्रव्योभयसमवेतत्वादि निषस्यद्रव्यत्वव्यभिचारित्वादेः स्वी
दि निषद्रव्यत्वव्यभिचारित्वाद्यात्मकसाधारण्यादितो न तिरिक्तेऽपि न स्वतिपर्वम्नः पर्वतोऽग्रहनाम द्रहन्वानधूमाद्धूमादित्यादा
वसिद्धिः स्यादन्यथा हेत्वाभासः लक्ष्यस्त्वो न कथं वर्त्तिरनुसर्त्तव्यान्तत्र ज्ञानस्य विषयतया विशिष्टपक्षग्रहविरोधितावच्छेदकं रूपमाश्रया
यासिद्धिं विशिष्टपक्षसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकं स्वरूपासिद्धिः संपक्ष
तेषे व्यमनीलं गगनं रूपवत् शास्त्रस्पर्शवत्वादित्यादौ गगनादेर्निस्पर्शत्वादित्यादिकं एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्वात् गुणा
न्यत्वविशिष्टसत्वे द्रव्यत्वस्याव्यभिचारी गुणानवृत्तित्वादित्यादावपि नाव्याप्तिः तदुभयान्यासिद्धिर्व्याप्त्यात्मासिद्धिः यत्र हेतुर्न सि

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेतुर्भेदादावनाश्रकाभिद्धादिरूपपक्षसिद्धं तत्र तदन्यत्वं संगच्छमिति अथ परंपरास्थापने परामर्शविरोधितावच्छेदकत्वं साधारणाद्यारि
पि सत्ते । भिन्नं तं मलीनः । असाधारणस्य सत्प्रतिपक्षविषयानुमितिप्रसेव । विरोधित्वात् तदन्यत्वप्रवेशे न साध्याभावसामानाधिकरणस्यावि
रणायोगाद्दाहरू । व्यतिरेकि साध्यसामानाधिकरणगहविरोध्यात्मकविज्ञेसर्वः परामर्शविरोधिनीं का । मिनीजिता सामानाधिकरण्यका
भिन्यादावतीव्याप्तेर्वारणाय ज्ञानस्येति । यादृशविशिष्टविषयकज्ञानत्वं प्रकृतपरामर्शव्यापकविषयताभून्यज्ञानवृत्तिवं
धकतावच्छेदकीभूतविषयितानतिरिक्तवृत्ति साधारणादिभिन्नत्वादृशविशिष्टपदार्थो यस्यातिरिक्ते तु फलितार्थः ननु हेतुः कोव
नमपक्षवह्निमानधूमादित्यादौ साधारणाद्यसिद्धेः तत्रस्वरूपासिद्धादावव्याप्तिरत आह यत्रेति अपसिद्धमिति तत्र तदन्यत्वं नोप
देयमित्यन्वयः ननु वस्तुत्वव्यभिचारिमेयत्ववत्पक्षतोवह्निमान्मेयत्वादित्यादौ आश्रयासिद्धावव्याप्तिवह्निर्व्यभिचारिमेयत्वाद्या
काया: तस्यासाधारणाद्यभिन्नत्वादत आह यत्र चेति मतु वं तत्र यं य । हिमतस्य विशेषणांतराप्रयोगेनासाधारणत्वं द्विती
येनासाधारणत्वं तत्तीयेनानुपसंहारित्वं आश्रयासिद्धेर्लभ्यते ननु परामर्शोपि ह्यवयवेऽपि गर्भः तदाव्यतिरेकव्याप्तिविशिष्ट राम०
पक्षधर्मताभावाद्व्याप्तिरताह परामर्शेचेति ननु द्रव्यत्वाव्यभिचारिद्रव्यगुणोभयसमवेतवान्घटोद्रव्यसत्वादित्यादौ द्रव्यगुणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्याप्तत्वमित्यत्रापि विपक्षेतिसंपातायां तद्दूष्यांसपक्षव्यावृत्तत्वस्यैव दूषकत्वादित्यन्ततएव सपक्षवृत्तित्वांशस्यापेक्षितत्वादे
वेत्यर्थः अन्यथानुविरुद्धस्य सपक्षवृत्तित्वाभावादनेन रूपेणोपसंगतत्वापत्तेः साध्याभावव्याप्तस्य विरुद्धपदार्थस्य तदुभयव्यावृ
त्तत्वासंभवादिमानत्परामर्शप्रयोगादितिभावः अनुमितिविरोधित्वविशेषणस्य सद्धेतुवारकत्वात्तद्वैयर्थ्यापत्तेर्योगाभावशेषविशे
षणात्वामिति हेत्वाभासपदं साधारण्यकीर्तनमात्र हेतुमदिति साध्यादिव्याप्यस्यापि दृष्टविशेषे असाधारणताजन्यातिव्याप्तिरेव
अव्यत्तिहेतावपीसत आह एवं चेति प्रकृतहेतौ साध्यव्याप्यत्वग्रहविरोधित्वे सति साध्याभावव्याप्यत्वग्रहविरोधिपद्धतिमत्वप
हाविरोधितत्पदं तद्वत्वमर्थः व्याप्तिग्रहविरोधित्वं च नादृश्यव्याप्तिग्रहत्वाव्यापकविषयापि नाशत्वग्रहविरोधित्वं तेन वह्न्यभावा
दिधर्मिवह्निव्याप्यत्वसाकारकग्रहस्याहार्यत्वेन तत्समानविषयकस्य धर्मिवह्निव्याप्यत्वसाकारकग्रहस्यैव विरोधिनामादापव्वह्निमा
न्वह्निव्याप्यवादिधर्मादिसाधारणादिपग्रहः साध्याभाववत्तित्वादिमात्रस्य साध्यतदभावोभयव्याप्तिग्रहविरोधित्वात्तसा
धारणादिकमस्य व्याप्तिर्वक्ति साध्यतदभावेत्यादिना असाधारण्यमितिरहमुपलक्षणं केवलान्वयिधर्मावच्छिन्नपक्षता
कत्वे सति साध्यतदभाववद्वृत्तित्वमनुपसंहारित्वमित्यपि दूष्यांशाभिप्रायेण साध्यतदभावव्याप्यो हेतुरित्यर्थः अत्र हेत्वाभास

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लन्नस्यरणोऽक्रीसापाद्दव्यविशिधेयविषयकं व्याप्तिद्रूपग्रहविरोधिनामतिरिक्तवृत्तिताद्दशरूपवत्त्वमेवप्रासिमार्थे वाच्यः न च्या
घमेयत्वादि विशिष्टसाध्यतदभाववद्वृत्तित्वे ऽनित्यासिर्नैहि ताद्दशाधर्मान्तराघटितत्वविशेषणमात्राद्दपिशकानैवकं साध्यतद
भाववद्वृत्तित्वादेः साध्याभाववद्वृत्तित्वादितादृशधर्मान्तरघटितत्वेनासंभवापत्तेः किंच साध्यवद्वृत्तित्वांशग्रहस्य साध्याभाववाभा
वत्वेन साध्यविषयकत्वात् साध्याभाववद्व्याप्तिग्रहविरोधित्वमित्याशयेनोक्तं हेद्दयमितिलक्षणाकृतोल्लेद्दयेन तत्स्माकमित्यर्थः अ
सिद्धिविशेषइतित्वरूपासिद्धिव्याप्यत्वसिध्योरन्यतरत्वपक्षस्यार्थः वृत्तिमत्वेऽत्नि व्यावर्तनद्वारणार्थमेव हेत्वाभासपदं वृत्तिमत्वग्रह
व्याविरोध्यर्थकमितिभावः इदं शं वृत्तिमत्वग्रहविरोधित्वेनितव्यावर्वृत्तित्वग्रहाविरोधीसमनैवतस्यापि वारणमिति भावः
नुसाध्यतदभाववद्व्यायवृत्तत्वस्यवृत्तिमत्वाभावनियतत्वेन गृह्यमाणस्यैव वृत्तिमत्वग्रहविरोधित्वं न स्वरूपतोऽपि हीनस्यैत
नश्चाइनोभेद्दितिइदमेवेतिन व्यावर्तनिविष्टसाध्यतदभाववद्वृत्तित्वस्य व्याप्तिग्रहविरोधित्वेऽपि न हानिभावः अथवद्भिव्याप्य
त्वं साध्यादिमत्त्वात्त्रवृत्तित्वतदाद्वितीयनिरुक्तमेददसतश्चाहव्यापकेतिनवैवं वं हिं मान्वा हि व्यभिचारी धर्मादिसाधसाधारण राम०
व्याप्तिः धर्मोविद्वव्याप्यइत्याकारकग्रहान्यूनविषयताकत्वाद्धर्मसामान्यव्यापकत्वस्य विशिष्टधर्मव्यापकतानाश्रयतोनिरिक्तस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृत्तिवाख्यं एतदस्वरसेनैव द्वितीयलक्षणस्याहरादिति भावः भेदद्वयस्य प्रत्ययमाहित्याहि: साध्यवदभावयोरैक्यं तन्मात्रघटिते
रपि हेतौ ईदृशाविशेषेऽसाधारणत्वाननुगमहार्थं द्वितीयलक्षणस्यापि साध्यवदभाववन्मात्रग्रहाविरोधित्वरूपत्वमर्थो वा
थ इत्याह हि निद्वितीयस्ये सनुपसंहारेऽसाधारणतापाभावेति हेतुधर्मिकसाध्यवदभाववद्यात्मकत्वतानाभावविशिष्टे सर्वथः न च
पत्तहेतौ नादृशाज्ञानमप्रसिद्धं तत्रासाधारणोव्याप्तिः। तत्र तादृशाविशेषणस्यानुपादेयत्वात् साध्यसाधनभेदेन सव्यभिचार
स्य भेदादिति भावः विशेषणेति असाधारणतापाभावकालावच्छिन्नविशेषणस्याभावादित्य असाधारणस्यनेन तत्सुरूप निपन्ने
तस्मात्तद्धेतौ संव्यभिचारत्वमप्येवं पुरुषनियं त्रितयस्यादित्यभिप्रेत्याह तत्स्थितं स्यामिति उक्तसव्यभिचारेणासाधकतानुरूपावष्टम्भकसे
मानाभावात्तत्रैव यत्र सम्भवादस्य प्राप्तावेव विरोधादेरिति आदिपदार्थान्तरत्वपरिग्रहः साध्याभावेति साध्याभाववद्याप्याम
त्वादिकमित्यर्थः आदिपदार्थान्तिमत्वग्रहाविरोधित्वपर्यवसंन्नस्य हेत्वाभासत्वस्योपग्रहः ननु एवमुक्तनिरुक्तासव्यभिचारेत
रभेदानुमाने विरोधादौ व्यभिचारहस्तन आहतस्येति विरोधादेरित्यर्थः तन्निमत्वग्रहविरोधित्वरूपस्याख्यानहेत्वाभास
त्वस्य प्रत्ययमतः स्मृत्वहत्वादुभयपर्याप्तिमग्रहविरोधिनः निरुक्तसाध्यवदभाववद्यात्मकत्वमादायैव गगनमनित्यमित्याद्यसाधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणासंग्रहाद्याहम्प्रथममिसा। हीति प्रथमव्याख्यानुसारेणान्तर्भ्मेगगनाद्यवृत्तिर्हेतोरेवासाधारणतयातस्यानुपसंहारणास्वा
दित्तिभावः। नोप्त्विसेत्यादिकवलेतुमनस्यामित्यादिनिपत्तैकव्यक्तिकमेवपक्षादिकं तत्रसर्वपदार्थप्रसिद्धेरव्याप्तिरतोव्याघेसपक्षविपक्ष
वच्छिन्नेतिसाध्यसामानाधिकरण्याभावस्य यत्र निश्चयस्तद्धर्मवत्वमित्याहसाहित्यर्थः उक्तान्यतरत्वेन सर्वथापि चारेन रपेदानुमानेव्याप्यतावच्छेदका
नरासंभवानन्तर्भ्य व्यर्थविशेषणत्वमतोदूषकतापांतद्येनपतिसपक्षेत्यादिव्याप्यविरुद्धयोरित्यस्य पक्षानिश्चयोरित्यादिः तेनवह्निर
नित्यः प्राकृत्वादित्यसाधारणस्य पक्षातिरिक्तत्वविशेषणात्संग्रहेपिनवृत्तिः संग्रहायेतिशब्दोनित्यः प्राकृत्वादित्यत्रव्याप्यस्य
हेतोः साध्यवन्मात्रवृत्तित्वेपिपक्षातिरिक्तमात्रवृत्तित्वा। वादेवशब्दोनित्यः प्राकृत्वादित्यत्रविरुद्धस्यहेतोस्साध्याभाववन्मात्र
वृत्तित्वेपिपक्षातिरिक्तत्रवृत्तित्वाभावादुभयसाधारण्योः संग्रहायेत्यर्थः पक्षत्वंयदिपक्षतपक्षतावच्छेदकधर्मवत्त्वंतदाद्रव्य
त्वहेतुरेवायवेनैकमसंदेहहेतुतापांद्रव्यंधूमाद्वह्निरित्यादिसाधारणव्याप्तिः द्रव्यामधूमवदप्रसिद्धेरतआहपक्षत्वमितितथा
चतत्साध्यसंदेहविषयीभूतद्रव्यस्यमहानसादावेवधूमवत्त्वान्तदोषः नचैवंद्रव्यसामान्येधूमवत्त्वसंदेहदशायांतत्साध्यमनो
कारइतिवाच्यंतत्रतद्धेतुतस्यानुपसंहार्यवाप्येरित्यादिनामहानसवत्समारामप्रायत्वादिनामहानसवत्समारामप्रायत्वादितिभावः राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्क्रमप्रसिद्धीरिति ननु पर्वतत्वकाञ्चनमयवह्निमान् धूमादित्यादौ साध्याप्रसिद्धिस्तावन्नस्य प्रकृतपक्षसाध्यवैशिष्ट्यावगाहिविज्ञानाविषया
देवतद्विषयप्रमा न साध्याप्रसिद्धौ लघुत्वे सम्भवात् साध्यपदं विफलमत आह साध्यसामान्येति नासंग्रह इति अन्यथा प्रकृतसाधनग्रहविरोधि
न पर्वतनावृत्तित्वविशिष्टवह्नित्वतात्रस्य प्रकृतमत आह साध्यसामान्येति नासंग्रह इति अन्यथा प्रकृतसाधनग्रहविरोधिनः पर्वतनावृत्ति
त्वविशिष्टवह्नित्वतात्रस्य प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वम् किं रूपस्य साध्यस्याभावेन तद्विषयीभूतापोस्याप्रसिद्ध्यादौ अव्या
प्तिरीव स्यादिति भावः लाघवादाह नस्यादिति निरुक्तस्य स्थापसाध्यप्रसिद्धेरित्यर्थः काञ्चनादिसत्त्वरसत्तत आह हीनाप्रमामात
त्कस्येव तात्रस्याविरोधित्वात्तात्त्वात्संदिग्धस्यत्वरूपासिद्धितात्रस्य निरुक्तरूपस्यात्तद्विषये स्वरूपासिद्ध्यादावतिव्याप्तिरित्यादि
कं रूपत्वेनानुव्याप्तेरसिद्धिर्व्याप्यत्वासिद्धिरित्यसुस साध्याप्तिविरहस्येव व्याप्यताऽसिद्धिपदार्थत्वात् साध्याप्रसिद्ध्यादिसाधारण्यात्
रतानयुक्तमिसाशंकामपाकरोति साध्येहेत्वित्यादिना पादव्याप्यत्वासिद्धिपदं न योगिकं अपितु रूढमिति भावः यावद्व्याप्यत्वनवच्छेद
केतस्यातिलघुमत्वादेरनाहृशोनेति व्याप्यतानवच्छेदकीभूतेनेत्यर्थः तेन द्रव्यं गुणादित्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्तात्वस्यत्वम
मानाधिकरणोबद्गुणासत्त्वेन द्रहीनत्वेप्यवच्छेदकत्वेन यमाहाकालनिरूपितविशेषणतया गुणान्यत्वस्य हेतुतायां गुणात्मत्वस्या

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१

पिधूमत्वव्याप्यतावच्छेदकत्वाद्गुर्वैर्दोष नावच्छेद्यं प्रकृतहेतुतावच्छेदकत्वसंबंधेनयद्व्याप्यत्वं तद्वच्छेदकांतराघटितत्वस्यैव प्रवेश
त्वादिति भावः धूमप्रागभावत्वस्य धूमविशिष्टप्रागभावत्वादेर्वा व्याप्यतावच्छेदकांतरीभूतधूमत्वादिघटितत्वावच्छेदकत्वन्यास
मानाधिकरण्येनेति प्रकृतहेतुतावच्छेदकताघटकसंबंधेन यत्स्वाधिकरणं तन्निरूपकत्वं व्याप्यतावच्छेदकताघटकसंबंधेनवृत्तित्वमते
स्वार्थस्तेन धूमत्वधूमप्रागभावत्वयोरपि यथाक्रमं वृत्तित्वसंबंधेन निरूपसामानाधिकरण्येपि न क्षतिः प्रकृतहेतुतावच्छेदकताघटकसंबं
धेन स्वाधिकरणेनैव संबंधेन पर्जन्यमानत्वेनु स्वसामानाधिकरण्येन वाच्यं धूमत्वप्रकारकप्रमाविशेष्यत्वादेरपि वह्न्यादिव्याप्यता
वच्छेदकत्वपत्तेः धूमप्रागभावादिकं न लिंगप्रागभावप्रागभावादिनां व्यर्थत्वादिति परामर्शीयमूलमनुरुध्य सामानाधिकरण्यमपि दृष्टम्ः
नाहृशेनवेति धूमत्वादेरपि स्वात्मकतादृशधर्मघटितत्वावच्छेदकत्वेपि स्वादृतो धर्मांतरेणासंतरपदेन चैवं धूमत्वविशिष्ट धूमत्वमप्यव
च्छेदकं स्याद्धूमत्वस्य विशिष्टाभिन्नतया धर्मांतरत्वाभावादिति वाच्यं स्वानवच्छिन्नप्रकारतावच्छेदकत्वस्य धर्मांतरपदेनोक्तत्वादिति
भावः तत्त्वं व्याप्यतानतिरिक्तवृत्तित्वं यद्व्याप्यावच्छेदकत्वमिसनुषमतेसमसंतस्येति वह्निमान्द्रव्यादित्यादौ द्रव्यत्वादेरवच्छेदकत्ववारणा रापं०
यानतिरिक्तवृत्तित्वांशः स्यावरूपकत्वादिति भावः न व्याप्यतावच्छेदकत्वं कालिकसाधरणायोः परत्वात्परत्वन्नासोः प्रमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णाभावाद्याहार्यग्रहेऽप्यनिवृत्तिरिष्टमुपलक्षणत्वं वेगादिसाधारणपरस्कारत्वज्ञाने रसत्वेग्रहापत्तिं शान्तिवेस्यापि द्रव्यत्वं व्यक्तिनापुरसकर्म
गौरवं दूषणीयं तादृशत्वमिति ---- पक्षासाधितिन यासं नन स्यापिति पूर्वं यान्वयन तु निलधूमत्वादिकं विवसामावत्वादि द्रव्यत्वमप्यव
छेदकं मानं तत्को दोषं इत्यत आह हेतुत्वेनेतादृशेति हेतुतावच्छेदकविशिष्टेत्यर्थः केवलान्वयि खंडकानामनमाह साध्याव्यभिचा
रितेत्विति साध्याव्यभिचारित्वे सति संबंधसमानाधिकरणो यस्तादृशो हेतुतावच्छेदकाविशिष्टहेतुस्तस्येत्यर्थः तानस्यात्तियस्त्वधर्म
नेत्यादिनिरुक्तेनिस्वरूपसंबंधात्मकव्याप्यतावच्छेदकत्वाभावस्य हेत्वाभासत्वापोगादित्यर्थः यद्विषयकज्ञानमनुमितेः परामर्शस्य वा
प्रतिबंधकं तादृशयथार्थज्ञानविषयत्वमुद्भाविरोधितत्त्वं हेत्वाभासत्वात्तच्च हेतुतावच्छेदकधर्मावच्छिन्नमेव साध्यव्यभिचारित्वसंबंधित्वं व्याप्तिस्तादृशसंबंधि
नामात्रस्यतत्त्वेपर्वतेनियतवह्निरेवतयाहाधूमवानन्वयहेत्वादिप्रयोगेऽपि बाधानिरूहापत्तेः तथा च व्याप्त्यभावविषयत्वे हेतुताव
च्छेदकस्यानिरत्वेऽनवच्छेदकत्वदोषः इति वाच्यं पराद्वयत्वे व्याप्तेरिति प्रसक्तधर्मेणाहेतुप्रयोगस्यापि पक्षपक्ष्यं ग्रहस्यान्त्वादिवातेन
संगभंगे हेतुतावच्छेदकधर्मावच्छिन्नत्वस्य व्याप्यादनंतरमावादित्ति भावः ननु व्यर्थविशेषणत्वमपिप्ति यद्रूपेणाहेतुप्रयुक्तेनेतस्य
स्वसमानाधिकरणव्याप्यतावच्छेदकत्वानंतरघटितत्वमपिप्तिविभाजकसूत्रस्थेति हेत्वाभासाश्रयप्रयोक्तोरिसंगतिमसत्वस्यचका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेणोसर्वपृथ्वीवहेत्वाभासादिष्वतिरिक्तमेवनवधूमादिसत्त्वेवस्मन्वत्वेनैनलघूमादिसत्त्वप्रतियोगीधिकमेवानिग्रहस्थानमस्तिहे
त्वंवशाब्दसमुच्चयेनैनिवार्यहेत्वाधिकमितिसूत्रइष्याहेतुदूपादिप्रसंग्लयेवाधिकस्यत्वएवाधिकस्यनिग्रहस्थानत्वादितिभावः
मारीतुतनाविषयपिनायाः समप्रकारकत्वाखिकाराहाहस्मतिरिकेति समप्रकारकाविरोध्यमतावादिमनेनेस र्वःन्यपक्षनिष्ठत्वंपद्यभावा
न्वैनयप्रकारांतरवैयर्थ्यमनोमयथासावपेपक्षद्रसादिनाप्रकारभावेसत्रपदिनादृशप्रकारस्याभावइतिनसुरत्वः नहासाध्यस्यस
नत्वप्रतियोगीत्वाभावाद्धूधमात्रासंग्नहः स्यादितकर्मधारयाभिप्रायेणायोन्नयतिग्नेयप्रकारः साध्याभावइतिहेत्वादीस्यादिनाहेतु
नावच्छेदकाद्युपग्रहाननुपक्षधर्मिकसाध्याभावप्रमात्वरूपस्यबाधत्वस्यग्रहेपिक्षेसाध्याभावस्याभानादंधेसादिमूलासंगतिरतस्त्रा
हसाध्याभावेतिपक्षधार्मिकेत्यादिश्चावधाकाभिप्रायेणोक्तिपक्षसाध्याभाववानितिज्ञानस्यस्मांशो।साध्याभावप्रमात्वग्रहेपीपक्षध
र्मिकसाध्यनुमितिसाविरोधित्वानपक्षां।सेसाध्याभावप्रमात्वस्यैवग्रहत्वादृशानुमितेःविरोधाश्रयक्षां।सेसाध्याभावप्रमात्वंवसाध्या
भाववत्पक्षधर्मिकसाध्याभावप्रकारकत्वमितिस्यवर्शतादृशप्रमात्वग्रहदृशायांपक्षेसाध्याभावस्यभानमितिभावः ननुपक्षविषयता
रूपसाध्याभाववद्विशेष्यत्वावच्छिन्नसाध्याभावप्रकारकत्वमेवपक्षांसेसाध्याभावप्रमात्वंवासंनद्युप्रसक्षसाध्याभावस्याभानेपिसु राम ४

